# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षा –आचार्यद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् – ३ | |
| विषयः – वास्तुशास्त्रम् | (C.C.- 5.3.8. Old & New ) | गुणाः – ७० |
| दिनाङ्कः – ११/१०/२०१९ | सन्दर्भग्रन्थः मयमतम् | समयः –०३.०० तः ६.०० |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितयोः एकाकारिका सान्वयं व्याख्यात।** (५)

(१) समं तन्मण्डपं तस्य सान्तरालं सवेशकम्।
युग्मस्तम्भसमायुक्तं युक्त्या सर्वाङ्गशोभितम्॥

(२) स्त्रीपुंनपुंसकं चैव त्रिविधं तत् प्रवक्ष्यते।
इष्टकाभिः शिलाभिर्वा सञ्चितं यद् धनीकृतम्॥

**प्रश्नः २** एकभूमिविधाने द्वारविधानं स्पष्टयत। **(१०)**

**अथवा**

त्रिभूमिविधाने मुखमण्डपविधानं दर्शयत।

**द्वितीयान्वितिः**

**प्रश्नः ३ निम्नलिखितयोः एकाकारिका सान्वयं व्याख्यात।** (५)

(१) भागेष्वेकैकभागोनं स्वाधिष्ठानान्ततुङ्गकम्।
शेषं तदुपपीठं स्यात् पादबन्धं मसूरकम्॥

(२) अधिष्ठानोपरिस्तम्भं प्रस्तरं च त्रिवर्गकम्।
कपोतप्रतिसंयुक्तं यत्तन्मण्डपमिष्यते॥

**प्रश्नः ४** कुण्डलक्षणं ग्रन्थोक्तदिशा दर्शयत। **(१०)**

**अथवा**

गोपुरालङ्कारः ग्रन्थाधारेण प्रदर्शयत।

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितयोः एकाकारिका सान्वयं व्याख्यात।** (५)

(१) तैतलानां द्विजादीनां पाषण्ड्याश्रमिणामपि।
हस्त्यश्वरथयौधानां यागहोमरिशिल्पिनाम्॥

(२) सर्वासामपिशालानामेतत् सामान्यमीरितम्।
हस्तच्छेदप्रवृद्ध्या वा हान्या पूर्णं यथा कुरु॥

**प्रश्नः ६** द्विशालाविधानं ग्रन्थाधारेण दर्शयत। (१०)

**अथवा**

चतुःशालसमान्यविधिः ग्रन्थाधारेण स्पष्टयत।

## चतुर्थान्वितिः

**प्रश्नः ७** **अधोलिखितयोः एकस्य उपरि सान्वयं व्याख्यां कुरुत।** (५)

(१) मृण्मया वा लुपारूढा तृणादिच्छादनान्विता।
खलूरिका वा कर्तव्या वेदिकापादशोभिता॥

(२) अथनिष्पन्नगृहं प्रविश्य तं त्वरितं न प्रविशेदनिष्ठितम्।
यदि निष्पन्नमवेशितं चिरं सुरभूतादिगणाश्चरन्त्यलम्॥

**प्रश्नः ८** चतुर्थगृहविधाने वारतिथिविधानं वर्णयत। (१०)

**अथवा**

गृहप्रवेशे बलिदानविधानं ग्रन्थाधारेण दर्शयत।

**प्रश्नः ९** **अधोललिखितेषु केषाश्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु।** (१०)

(१) स्तम्भोपरि तोरणं स्थापनीयं न वा ?
(२) हव्यप्रकोष्टकं कस्मिन् दिशायां स्थापनीयम् ?
(३) साधारणमण्डपं वैश्यानां कृते उपयुक्तमस्ति न वा ?
(४) शालोत्सेधभेदाः कति ?
(५) प्रासादनिर्माणे वास्तुदेवानां बलिदानं दातव्यं न वा ?
(६) अशोकवृक्षः किलकनिर्माणे प्रयुज्यते न वा ?
(७) अधिवासमण्डपः भवनस्य कस्मिन् भागे स्थापनीयम् ?
(८) नागरभवनस्य आकृतिः किदृशी ?
(९) इष्टकाभिः शिलाभिर्वा निर्मितभवनस्य नाम किम् ?
(१०) वृत्तकूटभवनस्य शिखराकृतिः किदृशी?
(११) जगतीप्रकाराः कति ?
(१२) आयाः कति ?
(१३) प्रासादनिर्माणे शुभआयाः के लिखन्तु ?
(१४) अभिन्नगृहं संधिसहितं वा संधिरहितं भवति ?
(१५) खलूरिकायाः निर्माणद्रव्याणि लिखत।

--००--